# Shri Dattaguru Stava

# શ્રીદત્તગુરુસ્તવઃ

## Document Information

Text title : Dattaguru Stava

File name : dattagurustavaH.itx

Category : deities_misc, dattatreya, ApaTIkara

Location : doc_deities_misc

Author : ma. sa. ApaTIkara

Transliterated by : Mandar Mali aryavrutta gmail.com

Proofread by : Mandar Mali aryavrutta gmail.com

Description/comments : stotrapanchadashI by Shri M. S. Apatikar, Satara

Source : Sharada year 11, Vol 21-22, September 1970

Acknowledge-Permission: Pt. Vasant A. Gadgil, Sharada Gaurava Granthamala, 425 Sadashv Peth, Pune 30

Latest update : September 14, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose. Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

**Please help to maintain respect for volunteer spirit.**

September 15, 2019

*sanskritdocuments.org*

# Shri Dattaguru Stava

# શ્રીદત્તગુરુસ્તવઃ

(દોધકમ્)

ભક્તજનાર્તિ-વિકર્તિત-કીર્તિં
વેદચતુષ્ટયપૂજિતમૂર્તિમ્ ।
દણ્ડ-કમણ્ડલુ-મણ્ડિત-પિણ્ડમં
દત્તગુરું પ્રણમામિ સદાઽહમ્ ॥ ૧॥

પાટલ-વસ્ત્ર-વિભૂષિત-દેહં
ભસ્મ-વિભૂષિત-ગૌર-શરીરમ્ ।
ભૂતિકરં ભવ-ભીતિ-કુઠારં
દત્તગુરું પ્રણમામિ સદાઽહમ્ ॥ ૨॥

સજ્જન-પોષણ-રક્ષણ-દક્ષં
દુર્જન-શાસન-ભઞ્જન-મગ્નમ્ ।
સત્વર-દુસ્તર-દુઃખહરં તં
દત્તગુરું પ્રણમામિ સદાઽહમ્ ॥ ૩॥

દુઃખિત-વન્દિત-પાદ-સરોજં
પદ્મ-સુશોભિત-દક્ષિણ-હસ્તમ્ ।
યોગ-નિધિ નવ-નાથ-સનાથં
દત્તગુરું પ્રણમામિ સદાઽહમ્ ॥ ૪॥

ભીતિ-યુતો ભવ-સિન્ધુ-નિમગ્ન-
સ્ત્વચ્ચરણં કરવાણિ શરણ્યમ્ ।
અત્રિસુતં ત્રિગુણાદિ-વિહીનં
દત્તગુરું પ્રણમામિ સદાઽહમ્ ॥ ૫॥

સ્નાસ્યવિમુક્તક-તીર્થ-જલૌઘે
પ્રાર્થયસેઽન્નકણાન્ કરવીરે ।
ત્વન્મહિમા ન હિ માનમવૈતિ

ત્રાહિગુરો પ્રણમામિ સદાઽહમ્ ॥ ૬॥

દુઃખ-હુતાશન-તપ્તમધીરં
દત્ત દયાર્ણવ દીનજનં મામ્ ।
તારય પાહિ નિરન્તર-તપ્તં
દત્તગુરો પ્રણમામિ સદાઽહમ્ ॥ ૭॥

નાભિજ-વિષ્ણુ-સદાશિવ-મૂર્તિ
દીન-જનાવન-તત્પર-વૃત્તિમ્ ।
વિશ્વ-વિષાદ-વિનાશન-દક્ષં
દત્તગુરું પ્રણમામિ સદાઽહમ્ ॥ ૮॥

અષ્ટકમત્રિસુતસ્ય સુગેયં
દોધક-વૃત્તમિદં રમણીયમ્ ।
શ્રીગુરુનામ સદા નમનીયં
ભક્તજનૈઃ સતતં સ્મરણીયમ્ ॥ ૯॥

ઇતિ શ્રી આપટીકરવિરચિતઃ શ્રીદત્તગુરુસ્તવઃ સમ્પૂર્ણઃ ।

Encoded and proofread by Mandar Mali aryavrutta gmail.com

*Shri Dattaguru Stava*
pdf was typeset on September 15, 2019

Please send corrections to *sanskrit@cheerful.com*